सत्यशौचार्जवत्यागैर्वर्चसाविक्रमेणच क्षांत्याधृत्याचबुध्याचमनसातपसैवच १५ भावान्सर्वाननुपाव्रत्तान्समीक्ष्यविषया
त्मकान् शांतिमिच्छन्नदीनात्मासंयच्छेदिंद्रियाणिच १६ सत्वेनरजसाचैवतमसाचैवमोहिताः चक्रवत्परिवर्त्तंतेह्यज्ञानाज्जं
तवोभृशं १७ तस्मात्सम्यक्परीक्षेत्तुदोषानज्ञानसंभवान् अज्ञानप्रभवंदुःखमहंकारंपरित्यजेत् १८ महाभूतानींद्रियाणिगु
णाःसत्वरजस्तमः त्रैलोक्यंसेश्वरंकर्मअहंकारेप्रतिष्ठितं १९ यथेहनियतःकालोदर्शयत्यार्त्तवान्गुणान् तद्वद्भूतेष्वहंकारंवि
द्यात्कर्मप्रवर्त्तकं २०

क्षुस्त्वेतच्छमादिनासंभवेतसंयुञ्जीतेत्यर्थः अदीनात्माउदारचित्तः १६ विपक्षेदंडमाहसत्वेनेति १७ अज्ञानात्संभवउत्पत्तिर्यस्यतं १८ महेतिईश्वरादिकंसर्वम
हंकारकल्पितमित्यर्थः १९ नन्वेतदहंकारकल्पितंचेत्सर्वमन्वितमभिनवसंस्थानंस्यादित्याशंक्यापूर्वसंस्कारानुरोधात्समानरूपमेवकल्प्यतइतिसदृष्टां
तमाहयथेति। भूतेतिभूतेंद्रियादीनामुपलक्षणं २० ॥ ॥

मो॰
१२२

त्रिगुणात्मकस्याहंकारस्य गुणकार्याणि विभजते संमोहकमिति द्वसं अंधकारवत् प्रकाशात्मकं प्रीति दुःखैकमात्सात्विकराजसे २१ तान्कार्यभूतान्वि
शेषगुणान् २२ कामादयो राजसाः विषादादयस्तामसाः २३ अस्य विभागस्य प्रयोजनमाह दोषाणामिति आत्मनि संस्थानं स्थितिः एकैकं प्रत्येकं अनुल

122

संमोहकं तमो विद्यात्कृष्णमज्ञानसंभवं प्रीतिदुःखनिबद्धांश्च समस्तांस्त्रीनथो गुणान् २१ सत्त्वस्य रजसश्चैव तमसश्च निबोधत।
न प्रसादो हर्षजा प्रीतिरसंदेहो धृतिः स्मृतिः एतान्सत्त्वगुणान्विद्यादिमान्राजसतामसान् २२ कामक्रोधौ प्रमादश्च लोभमोहौ भयं
क्लमः विषादशोकावरतिर्मानदर्पावनार्यता २३ दोषाणामेवमादीनां परीक्ष्य गुरुलाघवं विमृषेदात्मसंस्थानमेकैकमनुसंततं २४
युधिष्ठिर उवाच के दोषा मनसा त्यक्ताः के बुध्या शिथिलीकृताः के पुनः पुनरायांति के मोहादफला इव २५ केषां बलाबलं बुध्या हेतुभि
र्विमृषेद्बुधः एष मे संशयस्तात तन्मे ब्रूहि पितामह २६

क्षीकृत्य विमृशेत् को दोषः कियान्क्षीणः कियानशिष्ट इति नित्यमालोचयेदित्यर्थः २४ त्यक्ताः पूर्वैर्मुमुक्षुभिरिति शेषः के पुनरिति अपरिहार्या इत्यर्थः।
पंचात्र प्रश्नाः अफलाः आगता अपि निष्फला इत्यर्थः २६

शां॰
१२२

दोषैरितिसार्द्धश्लोकएकंवाक्यंमूलात्मूलंत्वाशानंतदारभ्यअवच्छिन्नैःलूनैर्मूलच्छेदैर्नैवदोषानच्छिद्यात्ततस्तेपश्चाच्छिन्नमूलतरुविलसितवत्कंचित्का
लमनुवर्त्तमानाअल्पफलाएवतर्षः मूलच्छेदेउपायंसहस्रं तमाहविनाशयतीति। संभृतमुत्तमन्नमपथ्यंलोहनिगडं अयःवाग्धारामयं एवंकृतात्मा
ध्यानसंस्कृताबुद्धिः तामसैः विपर्यासरूपैरविद्यादिदोषैः सहजैरागादिभिः सहनश्यतिताञ्चाशपितास्वयमपिकर्त्तकरजोवत्शाम्यति अत्रवाग्धारानिग

भीष्मउवाच दोषैर्मूलादुपच्छिन्नैर्विशुद्धात्माविमुच्यते विनाशयतिसंभूतमयस्मयमयोयथा तथाकृतात्मासहजै
र्दोषैर्नश्यतितामसैः १७ राजसंतामसंचैवशुद्धात्मकमकल्मषं तत्सर्वंदेहिनांवीजंसत्वमात्मवतःसमं १८ तस्मादात्म
वतावर्ज्यंरजश्चतमएवच रजस्तमोभ्यांनिर्मुक्तंसत्वंनिर्मलतामियात १९ ॥ ॥ ॥ ॥

दुच्छित्वास्वयमपिनश्यतीतिविवक्षयादृष्टांतदार्ष्टांतिकयोःसाम्यं १७ चतुर्थप्रश्नोत्तरमुक्त्वातृतीयप्रश्नोत्तरंपादत्रयेणाहराजसमिति। शुद्धात्मकंसत्वांत
श्चाकल्मषंकाममोहरहितमात। गुणत्रयंदेहिनांदेहप्राप्तौवीजं आत्मवतोजितचित्तस्यतुसत्वंसमंब्रह्मतत्प्रापकं। निर्दोषंहिसमंब्रह्मेतिसमशब्दस्यब्रह्मणिप्र
योगात १८ प्रथमप्रश्नोत्तरमाहतस्मादिति। सत्वंबुद्धिः १९ ॥

मो०
१२३

123

अपवेति। आत्मालाभे न बुद्धिवशीकारणविहितं मंत्रवत् मंत्रयुक्तं यज्ञादिकं कर्म केचित् दुष्कृतमिति ब्रुवुः सांख्याः पशुबीजादिहिंसाहीनः धीमुख्योपायः श्रेय
निति भावः। अत्रायं सांख्यवृद्धानामभिप्रायः नहिंस्यात्सर्वा भूतानीति निषेधः पुरुषार्थः न तु क्रत्वर्थः येनाग्नीषोमीयं पशुमालभेतेत्यनेन समानविषयत्वं
स्यात्। यथा आहवनीये जुहोतीति होमार्थस्याहवनीयस्य जुहोतीति होमार्थेन पदेनापवादः स्यात्। न च पुरुषार्थस्य सतः क्रत्वर्थत्वमपि निषेधस्य वक्तुं यु
क्तं। कर्त्रैविकरणविरोधात् तत्र हि पुरुषार्थेनानृतं वदेदिति निषेधे सत्यपि दर्शपूर्णमासप्रकरणे पुनः क्रत्वर्थतया नानृतं वदेदित्यनृतवदनं निषिध्यते।
क्रतुमध्ये कारणविशेषात्पुरुषार्थनिषेधोल्लंघनेपि क्रतुवैकल्यं माभूदिति। तस्माद्भिन्नविषयत्वाद्धिंसाविधितन्निषेधशास्त्रयोः परिहृत्यापवादमु

अपवा मंत्रवद्धपुरात्मादानाय दुष्कृतं सैव हेतुरनादाने युद्धधर्मानुपालने ३०

त्सर्गः प्रवर्तत इत्यस्य न्यायस्याप्रवृत्तिः अधिकारभेदादपि तत्र तदप्रवृत्तिः गृहासक्तो हि हिंसाशास्त्रे अधिक्रियते न तु विरक्तः तस्माद्यदहरेव विरजेत्तदहरेव
प्रव्रजेदिति प्रव्रज्याविधानात्। न च गृहाश्रमोपि नित्यः तस्य रागतः प्राप्तत्वात् ब्रह्मचर्यादेव प्रव्रजेदिति विधिविरोधाच्च। तस्माद्यथा श्येनेनाभिचरन्यजेतेति
शास्त्राच्छत्रुमारणकामस्य श्येनो विधीयमानो हिंसात्मकफलद्वारा न हिंस्यादिति शास्त्रं निरुंधे तद्वत्स्वर्गपश्वादिकामस्य गृहमेधिनः ज्योतिष्टोमेन स्वर्गका
मो यजेत चित्रया यजेत पशुकाम इत्यादिविधिः पशुबीजादिहिंसा

राम०
१२३

त्मकसाधनद्वारा न हिंस्यादिति शास्त्रं निरुणद्धि तत एव पुरुषः प्रत्यवैतीति। यथोक्तं। दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः इति। यथा दृष्टः
सुखोपायो दोषादियुक्तः एवं वैदिकोपीति सांख्यकारिकार्थः स्वमतमाह सर्वे इति सर्वेति पाठेपि सैषदाशरथिरितिवत्संधिः सः मंत्रवान यज्ञादिधर्मः अन्ना
दानेवैराग्यनिमित्तं भवति चित्तशुद्धिद्वारा नित्यानित्यवस्तुविवेकादिप्रणाल्या भवतीति यावत् शुद्धधर्मः शमादिः तस्यापि रक्षणे सएव यज्ञादिधर्मो भवति। अ
यमर्थः विविदिषंतीति यज्ञेनेत्यादिश्रुतेरश्वेनतिगमिषतीत्यादौ गतावश्वस्येव विद्यायां यज्ञादीनां हिंसायुक्तधर्माणां साधनत्वं गम्यते। तथा शांतो दांत इ
त्यादिना निवृत्तिरूपस्यापि अहिंसादेर्धर्मस्य विद्यासाधनत्वं गम्यते यथा हि अश्वौ रथेनियुक्तौ अविरुद्धदिक्क्रियौ संतावेव इष्टं देशं रथिनं नयतः न
तु तयोरन्यतरस्य ईषदपि विरुद्धदिक्क्रियत्वे एवं यज्ञ ईषदपि हिंसाशास्त्रविरोधी चेत्तत्तर्हि कार्यं न भजेदिति यज्ञादिव्यतिरिक्तहिंसाया एव वा
हिंसाशास्त्रेणानर्थहेतुता बोध्यत इति तथा च सत्यं सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति। यत्तु कामो यज्ञस्यास्त्यंशतो दोषहेतुत्वेन नः
किंचिच्छिन्नः। स्वल्पः संकरः सपरिहारः सप्रत्यवमर्ष इति सांख्याचार्यवचनमपि तद्विषयमेवा पुराणे कर्मणि स्वल्पो हिंसाजन्योऽधर्मसंकरः स्वल्पे
नापि प्रायश्चित्तेन परिहर्तुं शक्योऽपरिहारो वा फलकाले सोढुं शक्यः सुखसमुद्रमग्नो दुःखकणिकां सोढुमर्हतीति सर्वमनवद्यं २० ॥॥

मो°
१२४

124

वैदिकोपिकर्मणिराजसंतामसंकाम्यक्रोधादिहेतुकंत्याज्यंसात्विकंसेव्यमित्याहश्लोकत्रयेण रजसेति अधर्मेतिच्छेदः लौकिकंतुराजसंतामसं
क्रोधर्मकर्मसुतरांत्याज्यमितिभावः ३२ सात्विकंतुमुमुक्षूणांपथ्यमित्यर्थः ३३ अध्यायः पूर्वाध्यायांतिमंश्लोकत्रयंव्याख्यातुमयमध्यायआरभ्य
तेरजसेतिरजस्तमसोः कार्यंमोहः विपर्ययः अनात्मनिआत्मबुद्धिः अज्ञानस्यहिद्वेशक्तीआवरणशक्तिर्विक्षेपशक्तिश्चतत्राद्ययावस्तुस

रजसाधर्मयुक्तानिकार्याण्यपिसमाप्नुते अर्थयुक्तानिचात्यर्थंकामान्सर्वांश्चसेवते ३१ तमसालोभयुक्तानिक्रोधजानिचसे
वते हिंसाविहाराभिरतस्तंद्रीनिद्रासमन्वितः ३२ सत्वस्थःसात्विकान्भावांश्छुद्धान्पश्यतिसंश्रितान् सदेहीविमलःश्री
मांश्छ्रद्धाविद्यासमन्वितः ३३ शांतौमोक्षधर्मेषुवार्ष्णेयाध्यात्मे॥ भीष्मउवाच रजसासाध्यतेमोहस्तमसाभरतर्षभ॥
क्रोधलोभौभयंदर्पएतेषांसादनाच्छुचिः १ परमंपरमात्मानंदेवमक्षयमव्ययं विष्णुमव्यक्तसंस्थानंविभुंतंदेवसत्त
मं २

रूपंरज्वादिआव्रियतेद्वितीययासर्पादिस्वरूपंविक्षिप्यते तेउभेअत्रक्रमेणतमोरजःशब्दाभ्यामुच्यतेमोहजाःक्रोधादयः १ शुद्धेःफलंजीवब्रह्मणोरैक्य
ज्ञानमित्याहपरममिति।परमंआत्यंतिकंपरंब्रह्मकोशपंचकातीतंआत्मानंप्रत्यंचं परमात्मानमात्मानमितिपाठांतरंस्पष्टार्थं अक्षयंनाशहीनंअव्ययं
ह्रासहीनं विदुःप्राचःशुचयइति इदानींतनोपिशुचिर्विंदतीत्यर्थः २

राम°
१२४

पिनष्टांगादिभिर्जडीकृतेंद्रियाच्युतस्वनष्टज्ञानाः ततो विचेतसः निर्विवेकाः ज्ञानसंमोहात्ता बुद्धिवैकल्यात्ता प्रज्ञाज्ञानाद्वा क्रोधं विक्षिप्तचित्ततां ३
मान मात्मनि पूज्यता बुद्धिः दर्पः उद्धतत्वलत्वं अहंकारः परेषां तुच्छीकरणं ४ जन्माजन्मकृतक्षणाः जन्ममरणयोः कृतस्वीकाराः ५ तैः क्रोधादिभिः
वद्धस्तान अभितः परिप्लवनं तत्तुमिष्ठनहेतौ शतृप्रत्ययः प्रपतं योषितो हे प्रत्वेन ज्ञानीपातपतंताः संसारपदस्तातेत्रमिवतंत्रेतंतु विताननं तंतुवापदेहेति ७ ॥

तस्मात्पापिनष्टांगाज्ञानभ्रष्टाविचेतसः मानवाज्ञानसंमोहात्ततः क्रोधं प्रयांति वै ३ क्रोधात्काममवाप्याथ लोभ
मोहौ च मानवाः मानदर्पावहंकारमहंकारात्ततः क्रियाः ४ क्रियाभिः स्नेहसंबंधात्स्नेहाच्छोकमनंतरं सुख
दुःखक्रियारंभाज्जन्माजन्मकृतक्षणाः ५ जन्मतो गर्भवासं तु शुक्रशोणितसंभवं पुरीषमूत्रविक्लेदं शोणितप्रभ
वाविलं ६ तस्माभिभूतास्ते वद्धस्तोनेवाभिपरिप्लवन् संसारतंत्रवाहिन्यस्तत्र बुध्येत योषितः ७ प्रकृत्याः क्षेत्रभू
तास्ता नराः क्षेत्रज्ञलक्षणाः तस्मादेतां विशेषेण न चाभीयुर्विपश्चितः ८ कृत्या ह्येता घोररूपा मोहयंत्यविचक्ष
णान् रजोऽन्तर्हिता मूर्त्तिरिंद्रियाणां सनातनी ९

यथा प्रकृतिः क्षेत्रं सं वध्नाति स्वमेतान् अपत्योत्पत्तिक्षेत्रभूताः जीवं वध्नंतीत्यर्थः अतीपात अतिक्रामेत सन्न्यसेदित्यर्थः न चाभीयुरिति पाठे नानुसरेयुरित्य
र्थः ८ शत्रुमारणार्थं मंत्रमयी शक्तिः कृत्या सैव रूपताः । रजसि रजोगुणे अंतर्हिताः सूक्ष्मरूपेण मृदि घटादिवत्स्थिता इंद्रियाणां मूर्त्तिरिंद्रियैः कल्पितेत्य

मो०
१२५

125

तदात्मकात्स्त्रीप्रधानात् एतेन सार्द्धश्लोकेन दोषनिमित्तं तद्रूपादयो विषयाः संकल्पकृता इति गौतमसूत्रार्थो दर्शितः अससंज्ञानमानुषेति संज्ञाहीनानन्त्वमीनूपकान्लिक्षादीनऋस्वकानअनाम्रान १० भुक्तान्नरेतोरूपातस्त्रेहात् इवांशतः पुत्राः रसतः स्वेदरूपात् रूह्यात् एकादयः एषां जंतूनां स्वभाववादे हष्टवादे षसमानेव तत्पर्यः ११ एवं हेयमुक्त्वा सर्वमाहर जइ इति प्रवृत्तिप्रकाशात्मके रजः सत्वे तमसि लीयते तद्वत्तमः अज्ञानाख्यं ज्ञानाधिष्ठ

तस्मात्तत्पात्मिकात् रागाद्दीज्ञाज्ञायंतिजंतवः स्वदेहज्ञानस्वसंज्ञानद्वंद्वं गात्कर्मीस्पजेत् स्वसंज्ञानस्वकोस्म
द्वन्दुतसंज्ञानहकर्मीस्पजेत् १० भुक्तोरसतश्चैव देहाज्जायंतिजंतवः स्वभावात्कर्मियोगाद्धातानुपेक्षे
तबुद्धिमान् ११ रजस्तमसिपर्यस्तंसत्वंचरजसिस्थितं ज्ञानाधिष्ठितमव्यक्तं बुध्यहंकारलक्षणं १२ तद्बीजं देहिनामाहुस्त
द्बीजं देहसंज्ञितं कर्मणाकालयुक्तेन संसारपरिवर्त्तिनं १३ रमत्ययं यथा स्वप्ने मनसा देहवानिव कर्मगर्भैर्गुणैर्देही गर्भे
तदुपलभ्यते १४

तेन अधिष्ठानभूते ज्ञाने धस्तं सत्तु बुध्यहंकारयोर्लक्षणं ज्ञापकं भवति १२ ततबुध्यहंकारविशिष्टमज्ञानं देहिनां जीवानां देहप्राप्तौ बीजं तत्स्य सकार्यस्याज्ञानस्य बी
जं अधिष्ठानभूतं ज्ञानं तं देवजीवसंज्ञितं देहिशब्दवाच्यात् ज्ञानेबीजसंज्ञितमिति पाठ तत अज्ञानविशिष्टं ज्ञानं बीजं ईश्वरस्तत्संसारं स्वर्पमेवाहकर्मणोति १३
अयं जीवः ईश्वरेवागर्भमातुरुदरे १४ १४

राम०
१२५

तत्रमांसपिंडभूतोसौपूर्ववासनावशाद्यंयंविषयंस्मरतितत्तद्ग्राहकमिंद्रियमस्याविर्भवतीत्याहकर्मणेत्यादिना १५ घ्राणंगंधचिकीर्षयेतिएतस्यैववासनावश
स्त्वष्टृत्वंदर्शितं १६ यापनंदेहयात्रानिर्वाहः १७ संजातैःसम्यङ्निष्पन्नैःगात्रैःश्रोत्रादिभिःकृत्वानरोवर्ष्मणाशरीरेणावृतःसन्तज्जायते ब्रह्मणासहेतिपाठः

कर्मणावीजभूतेनचोद्यतेयद्यदिंद्रियं जायतेतदहंकाराद्रागयुक्तेनचेतसा १६ शब्दरागाच्छ्रोत्रमस्यजा
यतेभावितात्मनः रूपरागात्तथाचक्षुर्घ्राणंगंधचिकीर्षया १६ स्पर्शेनत्वक्तथावायुःप्राणापानव्यपाश्र
यः व्यानोदानौसमानश्चपंचधादेहयापनं १७ संजातैर्जायतेगात्रैः कर्मजैर्वर्ष्मणावृतः दुःखाद्यंतैर्दुः
खमध्यैश्चनरःशारीरमानसैः १८ दुःखंविवादुपादानादभिमानाच्चवर्द्धते त्यागात्तेभ्योनिरोधःस्यान्निरोध
तोविमुच्यते १९ इंद्रियाणांरजस्येवप्रलयप्रभवावुभौ परीक्ष्यसंचरेद्विद्वान्सदावस्थाह्वचक्षुषा २० ॥

तरं १८ दुःखाद्यंतैरित्येतच्चाद्यंतयोर्दुःखमिति उपादानात्तद्देहेंद्रियादीनांगर्भेंऽगीकारात् अभिमानाज्जन्मानंतरंदुःखंदेहवद्वर्द्धते। एवंत्यागान्मरणादपिवर्द्ध
तेतस्तेभ्योहेतुभ्यःनिरोधोदुःखस्यस्यात्। कर्तव्यःयतोनिरोधस्तोविमुच्यते १९ रजस्यंतर्हितामूर्त्तिरिंद्रियाणामित्युपक्रांतमिंद्रियाणांरजोमात्रत्वमुपसं
हरति। इंद्रियाणामिति। परीक्ष्येति रजोरूपप्रवृत्तिनिरोधनेंद्रियनिरोधात्दुःखनिरोधोभवतीत्यर्थः २०

अतर्षुलं तत्स्माहीनं ज्ञानेंद्रियाणि चोपसर्पंति न त्वाप्नुवंति। इंद्रियार्थान्प्राप्यापीति शेषः तत्फलमाह हीनैरिति हीनैः क्षीणैः करणैरिंद्रियैः २१ ऊनचत्वारिंशः
॥ ॥ अत्र इंद्रियजये। ज्ञानात् ज्ञानं प्राप्य चरन् शमादीननुतिष्ठन् १ पुरुषा मनुष्याः द्विजाः त्रैवर्णिकाः मंत्रदर्शिनो ब्राह्मणाः २ तत्त्वार्थं प्रतिगतः निश्चयो येषां

126

ज्ञानेंद्रियाणींद्रियार्थान्नोपसर्पंत्यतर्षुलं हीनैश्च करणैर्देही न देहं पुनरर्हति २१ शांतौ मोक्षधर्मेषु वार्ष्णेयाध्यात्मे ॥
भीष्म उवाच अत्रोपायं प्रवक्ष्यामि यथावच्छास्त्रचक्षुषा तद्विज्ञानाच्चरन् राजन्प्राप्नुयात्परमां गतिं १ सर्वेषामेव भूता
नां पुरुषः श्रेष्ठ उच्यते पुरुषेभ्यो द्विजानाहुर्द्विजेभ्यो मंत्रदर्शिनः २ सर्वभूतात्मभूतास्ते सर्वज्ञाः सर्वदर्शिनः ब्राह्मणा
वेदशास्त्रज्ञास्तत्त्वार्थगतनिश्चयाः ३ नेत्रहीनो यथा ह्येकः कृच्छ्राणि लभतेऽध्वनि ज्ञानहीनस्तथा लोके तस्माज्ज्ञान
विदोऽधिकाः ४ तांस्तानुपासते धर्मान्धर्मकामा यथागमं न त्वेषामर्थसामान्यमंतरेण गुणानिमान् ५ वाग्देहमनसां
शौचं क्षमा सत्यं धृतिः स्मृतिः सर्वधर्मेषु धर्मज्ञा ज्ञापयंति गुणाञ्छुभान् ६ ॥ ॥ ॥ ॥ ॥ ॥

३ ज्ञानविदो ब्रह्मविदः ४ एवमुपायज्ञात्प्रशस्य तद्गुणानाह तांस्तानिति यथागमं यथाशास्त्रं तांस्तानिष्टापूर्त्तादीन् अर्थसामान्यं फलसाम्यं मोक्षाख्यं नि
रतिशयं। इमान् वक्ष्यमाणान् ५ गुणानेवाह वागिति। अवृत्तिहिंसाकामादिराहित्यं वागादीनां शौचं। सर्वेषु प्रवृत्तिनिवृत्त्यात्मकेषु धर्मेषु ६ ॥ ॥ ॥

ब्रह्मणि चर्या ब्रह्मचर्यं योगधर्मः ब्रह्मणो रूपं ब्रह्मप्रापकत्वात्तदभिन्नं परां गतिं मोक्षं ७ गतिमेव विशिनष्टि लिंगमिति लिंगं पंच प्राणा मनो बुद्धिर्दशेंद्रियसं-
घातरूपं तेन यत्र संयोगो नास्ति अत एव शब्दादिहीनं श्रोत्रेणाउपाधिना तदेव श्रवणं शब्दानुभवरूपं स्वरूपाद्यनुभवात्मकं तथा च शब्दादीनां व्यभिचारि-
त्वा केवलानुभवरूपं तदेव मुख्यब्रह्म निर्विकल्पकावस्थापरब्रह्मप्रापिकेत्यर्थः ८ वाचा संभाषा कथनं प्रवृत्तं यस्मिंस्तत्तथा भूतं यत्र ब्रह्मचर्ये तत्तमनः

यदिदं ब्रह्मणो रूपं ब्रह्मचर्यमिति स्मृतं परं तत्सर्वधर्मेभ्यस्तेन यांति परां गतिं ७ लिंगसंयोगहीनं यच्छब्दस्पर्शविवर्जितं श्रो-
त्रेण श्रवणं चैव तच्चक्षुषा चैव दर्शनं ८ वाकंभाषाप्रवृत्तं यत्तन्मनः परिवर्जितं बुध्या चाध्यवसीयीत ब्रह्मचर्यमकल्मषं ९
सम्यग्वृत्तिर्ब्रह्मलोकं प्राप्नुयान्मध्यमः सुरान् द्विजाग्र्यो जायते विद्वान्कन्यसीं वृत्तिमास्थितः १० सुदुष्करं ब्रह्मचर्यमुपायं
तत्र मे शृणु संप्रवृत्तमुदीर्णं च निगृह्णीयाद्द्विजो रजः ११ योषितां न कथाः श्राव्या न निरीक्ष्या निरंबराः कथंचिद्दर्शनादासां
दुर्बलानाविशेद्रजः १२

मनोमात्रेणावस्थानं परिवर्जितं विषयेंद्रियहीनं शब्देन वक्तुं योग्या सविकल्पकावस्थेत्यर्थः यत्तु बुध्या श्रवणमननोत्थया अध्यवसीयीत निश्चिनुयात निर्विचिकि-
त्सं परोक्षज्ञानमित्यर्थः ९ ब्रह्मचर्याणां क्रमेण फलमाह सम्यगिति ब्रह्मैव लोकस्तं मोक्षं सुरान्समलोकं कन्यसीं कनीयसीं १० संप्रवृत्तं समुत्पन्नं उदीर्णं वृद्धिंग-
तं रजः कामादिरूपं ११ रजो रागः १२ ॥

मो॰
१२७

127

दृष्टं अहंमातरंअहंस्वसारंअहमपाद्पाचितं अहंपरंचनाम्नीयात्राज्ञायत्नोयमुच्यतइत्यादिनाउक्तलक्षणं महार्त्तिःमुक्तवृध्यानंतपीडितः अद्भिस्त्रिरितिवा
पाठःस्वप्नेचरेतःस्त्रावेःस्नुमग्नः अघमर्षणंकृतंचसमसंचेत्स्कृत्रयं १३ रागयुक्तेनेत्यपपाठःमनसानिर्द्दहेदितिसंबंधः १४ कुणपमितिशरीरांतर्गतमलात्रंतंतव
पादृढबंधन सर्वदेहआत्मनोदृढबंधनमित्यर्थः १५ शिरानाड्यःतासांजालेः १६ दशवातादिदशकवहाःधमन्योनाड्यःपंचस्विंद्रियेषुगुणेस्वस्वविषयग्रह

रागोत्पन्नश्चरेत्कृछ्रमद्भिस्त्रिःप्रविशेदपः मग्नःस्वप्नेचमनसात्रिर्जपेदघमर्षणं १३ पाप्मानंनिर्द्दहेदेवमंतर्भूतरजोमयं
ज्ञानयुक्तेनमनसासंतत्तेनविचक्षणः १४ कुणपामेध्यसंयुक्तंयद्दृढच्छिद्रबंधनं तद्देहगतंविद्यादात्मानंदेहबंधनं १५
वातपित्तकफाद्युक्तैर्लक्ष्णांसंस्नायुमस्थिच मज्जांदेहंशिराजालैस्तर्पयंतिरसानुगां १६ दशविधाधमन्योत्रपंचेंद्रिय
गुणावहाः याभिःसूक्ष्माःप्रतायंतेधमन्योन्याःसहस्रशः १७ एवमेताःशिरानद्योरसोदादेहसागरं तर्पयंतियथाकालमाप
गाइवसागरं १८ मध्येचहृदयस्यैकाशिरातत्रमनोवहा मुक्तंसंकल्पजंन्हृणांसर्वगात्रैर्विमुंचति १९ ७ ॥ ॥

णांयारवंअत्ररसार्पणाद्द्वाराआवहंतीतियथा याभिरश्वत्थपर्णाशंकुतुल्याभिः १८ हृदयस्यकदंबकुसुमाकारस्यमांसपिंडस्यमध्येमनोवहाअन्नमयंहि
सौम्यमनइतिश्रुतेरन्नरसैर्हृदयांतर्वर्त्तिमनःप्रीणनकरीनाडीयथोक्तंअश्वत्थपत्रनाडीवत्हृदिसप्ततिशताधिका। नाडीमनोवहेत्युक्तंयोगशास्त्रविशारदैरिति सा
हिसर्वगात्रेभ्यःमुक्तमादायपापस्यान्मुखंकरोति १९ ॥

राम॰
१२७

एकाशिराकंपंसर्वगात्रैः संबद्धत्वात आहसर्वगात्रेति तैजसंगुणंऊष्माणं २० खवैः मंथनदंडैः देहस्यात संकल्पात खेभ्यइंद्रियेभ्यः खजातैः संकल्पजैः खजैः स्त्रीदर्शनस्पर्शनादिभिः २१ शुक्रंसंकल्पजमित्येतद्दुपादयतिस्वप्नेपीति स्त्रीसंगाभावेपिसंकल्पजंरजस्त्रीसंगः यथात्र्यमेतितिपेवमनोवहानाडीशुक्रेस्त्रजति २२ श्रीशिअत्ररसोमनोवहानाडीसंकल्पश्चेतिवीजानियस्यत्वीजमितियपाठः २३ प्रजानांशुक्रोद्रेकात अनुलोमप्रतिलोमगमनाद्वर्णसंकरकारिकांविघुर्विचारयेयुर्वि

सर्वगात्रप्रतापिन्यस्तस्याह्यनुगताः शिराः नेत्रयोः प्रतिपद्यंतेवहंत्यस्तैजसंगुणं २० पयस्यंतर्हितंसर्पिर्यद्वन्निर्मथ्यते खवैः शुक्रंनिर्मथ्यतेतद्वद्देहसंकल्पजैः खजैः २१ स्वप्नेह्येवंयथाभ्येतिमनः संकल्पजंरजः शुक्रंसंकल्पजंदेहात्स्रजत्यस्यमनोवहा २२ महर्षिर्भगवानत्रिर्वेदतच्छुक्रसंभवं त्रिवीजमिंद्रदैवत्यंतस्मादिंद्रियमुच्यते २३ येवैशुक्रगतिंविद्युर्भूतसंकरकारिकां विरागदग्धदोषास्तेनाप्युर्देहसंभवं २४ गुणानांसाम्यमागम्यमनसैवमनोवहं देहकर्मानुदन्प्राणानंतकालेविमुच्यते २५ ॥

चार्यविरागाः दग्धदोषाः निर्वासनाः २४ देहानवाप्नोत्यनुष्ठेयांतरमाह गुणानामितिमनसैवगुणसाम्यंनिर्विकल्पत्वंआगम्ययोगवलेनासाद्यमनोवहंसत्यलोकप्रदंसर्वोर्ध्वंसुषुम्नाख्यनाडीमार्गप्रतिश्रित्यकालेप्राणानुदन्प्रेरयन्विमुच्यते कः यः देहकर्मदेहनिर्वाहमात्रार्थंकर्मयस्यावाह्यप्रवृत्तिशून्यइत्यर्थः २५ ॥

देहबंधच्छेदे योगमार्गक्रममुक्तिदमुक्त्वा जीवन्मुक्तिकरं ज्ञानमार्गमाह भवितेति मनसो विश्वात्मकस्य ज्ञानं भविता भविष्यतीत्यर्थः कीदृशं तत्तज्ज्ञानं मन एव प्रजापतेरिति स्वप्रव
वत्सर्वविषयाकारं भवतीति एतज्ज्ञानवतः फलमाह मंत्रसिद्धं प्रणवोपास्तिसिद्धं मनः नित्यं अनादि मायामात्रं सत् विरजं निर्वासनं ज्योतिष्मत् प्रकाशवत् सर्वज्ञं सर्वश
क्ति च भवति यथोक्तं वासिष्ठे विगतवासनमाशु चिपाशतामुपगतं मनस्त्रो मतयोदितं यदभिवांछति तत्त्वविक्षणात्सकलशक्तिमयो हि महेश्वरइति २६ तद

भविता मनसो ज्ञानं मन एव प्रजापते ज्योतिष्मद्विरजो नित्यं मंत्रसिद्धं महात्मनां २६ तस्मात्तदभिघातायकर्मकुर्यादकल्म
षं रजस्तमश्च हित्वेह यथेष्टां गतिमाप्नुयात् २७ तरुणाधिगतं ज्ञानं जरादुर्बलतां गतं विपक्वबुद्धिः कालेन आदत्ते मानसं
बलं २८ सदुर्गमिव पंथानमतीत्य गुणबंधनं यथापश्येत्तथादोषानतीत्यामृतमश्नुते २९ शांतौ मोक्षधर्मेषु वार्ष्णेयाध्यात्मे
भीष्म उवाच दुरंतेष्विंद्रियार्थेषु सक्ताः सीदंति जंतवः येत्वसक्ता महात्मानस्ते यांति परमां गतिं १ ॥ छ ॥ छ ॥

भिघाताय मनोनाशाय अकल्मषं निष्कामं निरूपं यथा येन प्रकारेण इष्टां गतिं मोक्षं २७ जरया दुर्बलता जरादुर्बलता तां तां गती प्राप्तत्वात् र्थेनेति समासः मा
नसं बलं संकल्पं आदत्ते संहरति कालेन पूर्वभाग्येन न तु हठयोगपतया २८ गुणा देहेंद्रियादयस्तदेव बंधनं २९ चत्वारिंशः पूर्वोक्ते बंधनेऽसक्ते वाधिका
रिभेदानाह दुरंतेष्विति १ ॥

क्लमैः क्लेशैः संततंव्याप्तंदृष्ट्वैवनतुममइदानींक्लेशोनास्तीत्युपेक्षेत १ घटनमेवाहाध्यायेनवागिति ३ अपवेतसव्यर्थेभूतानुकंपयापिमनसःसंगंव
र्धयेत् यथोक्तं कृपयापिकृतःसंगः पतनायैवयोगिनां इतिसंदर्शयन्नाह भरतस्यैणपोषणमिति ५ शुभंकर्माहाहिंसेति ६ बुध्याइदंसर्वंपद

जन्ममृत्युजरादुःखैर्व्याधिभिर्मानसक्लमैः दृष्ट्वैवसततंलोकंघटेन्मोक्षायबुद्धिमान् १ वाङ्मनोभ्यांशरीरेणशुचिःस्या
दनहंकृतः प्रशांतोज्ञानवान्भिक्षुर्निरपेक्षश्चरेत्सुखं ३ अपवामनसःसंगंपश्यन्भूतानुकंपया तत्राप्युपेक्षांकुर्वीत
ज्ञात्वाकर्मफलंजगत् ४ यत्कृतंस्याच्छुभंकर्मपापंवायदिवाश्नुते तस्माच्छुभानिकर्माणिकुर्याद्वाबुद्धिकर्मभिः ५
अहिंसासत्यवचनंसर्वभूतेषुचार्जवं क्षमाचैवाप्रमादश्चयस्यैतेससुखीभवेत् ६ तस्मात्समाहितंबुध्यामनोभूतेषुधा
रयेत् यश्चैनंपरमंधर्मंसर्वभूतसुखावहं ७ दुःखनिःसरणंवेदसर्वज्ञःससुखीभवेत् तस्मात्समाहितंबुध्यामनो
भूतेषुधारयेत् ८ ॥

यमात्मेतिशास्त्रोत्ययासमाहितंस्थिरंरागद्वेषशून्यंएनंअहिंसादिरूपं ८ ॥ ॥ ॥ ७ ॥ ॥ ॥

अशुभं वर्ज्जमित्याहाईन्नापेति। नापध्यायेत् परानिष्टं न चिंतयेत्‌ अवद्धं स्वस्यायोग्यं परराज्यादिकं तो न स्पृहयेत्। असत्तत्‌ न संभाविवाः स्त्रीपुत्रादिकं न चिंतयेत्। अमो
घेति यत्नस्यावश्यं भाविफलत्वं सूचितं ज्ञाने ज्ञानसाधने अमानित्वादौ श्रवणादौ च। वाचामोघप्रयासेनेति पाठे वा चावदतेन वाक्येन अवागोघप्रयोगेनेति पाठे। वागि
ति वागादीन्द्रियव्यापारो लक्ष्यते ओघ इति कालपरिणाममपेक्ष्य क्रतुलिंगवत्स्वयमेव ज्ञानारंभश्चित्तपरिणामो भविष्यति किंतु नन्न प्रतयेत्सुपदेशपात्रे योवुद्धिः

नापध्यायेन्न स्पृहयेन्नाबद्धं चिंतयेदसत्‌ अयामोघप्रयत्नेन मनो ज्ञाने निवेशयेत्‌ वाचामोघप्रयोगेण मनो ज्ञं तत्प्रवर्त्त
ते ९ विवक्षता च सद्वाक्यं धर्मं सूक्ष्ममवेक्षता सत्यां वाचमहिंस्रां च वदेदनपवादिनीं १० कल्कापेतामपरुषामनृशंसामपै
शुनां ईदृगल्पं च कर्त्तव्यमविक्षिप्तेन चेतसा ११ वाक्प्रबद्धो हि संसारो विरागाद्व्याहरेद्यदि वुध्याप्यनुगृहीतेन मनसा कर्मता
मसं १२ रजोभूतैर्हि करणैः कर्मणा प्रतिपद्यते स दुःखं प्राप्य लोकेस्मिन्नरकायोपपद्यते १३ १३ ॥ ॥ नः ॥ ॥

साकाल्यात्ख्यातुष्टिरो घशब्दार्थः तदुभयं यत्र नास्ति तादृशः यमनियमादीनां योगांगानामयोगस्तेन तत्र ज्ञानं प्रवर्त्तते ९ सद्वाक्यं विवक्षता पुरुषेण ईदृक्‌
वक्तव्यं ईदृक्कथं यत्र अहिंस्रां वाचं वदेदिति द्वयोः संबंधः १० कल्कापेतां शाठ्यनहीनां ११ संसार ऐहिकः आमुष्मिकोर्थः सर्वो वाचैव प्रबद्धोस्ति अतः साध्वीमेव
वाचं वदेत्‌ वैराग्यं चेत्तदा मसहिंसादिकं कर्मणास्वोपव्याहरेत्‌ पुरापपापं वा कर्म स्वमुखेन प्रकाशितं चेत्तत्‌ क्षपतीति भावः १२ रजोभूतैः प्रवृत्तिपरैः १३ ॥ ॥

फलितमाहार्द्धेनतस्मादिति १४ सदृष्टांतंकर्मसंन्याससमाहप्रकीर्णेतिद्वाभ्यां आमिषभारंवहंतश्चोरः गम्यांदिशंराजकीयाद्यवरोधात्प्रतिकूलांबुद्धा आमिषंतत्त्यक्त्वान्यांदिशंग
छंतोपथ्यानवध्यंते एवमाविघकंकर्मादायकामाद्यभिमुखंसंसारभयंबुद्धाकर्माणिसंत्यजन्नेवध्यंतेइतितात्पर्यंप्रकीर्णमेषः विशस्तमेषश्चामिषमित्यर्थः। तस्याभारः क्लीव
त्वमार्षं १५ अनीहः चेष्टाशून्यः तपस्वीमनसश्चेंद्रियाणांचऐकाग्र्यंपरमंतपः तद्वान् १६ प्रयोगोयोगांगानामनुष्ठानंतत्ररतिः प्रीतिर्यस्यनिःप्रचारेणानिरुद्धेनाबुद्धिस्व

तस्मान्मनोवाक्शरीरैराचरेद्धैर्यमात्मनः १४ प्रकीर्णामिषभारंहियद्वद्धार्येतदस्युभिः प्रतिलोमांदिशंबुध्वासंसारमबुधा
स्तथा १५ तानेवचयथादस्युःक्षिप्त्वागच्छेच्छिवांदिशं तथारजस्तमःकर्माण्युत्सृज्यप्राप्नुयात्सुखं १६ निःसंदिग्धमनीहो
वैमुक्तःसर्वपरिग्रहैः विविक्तचारीलघ्वाशीतपस्वीनियतेंद्रियः ज्ञानदग्धपरिक्लेशःप्रयोगरतिरात्मवान् निःप्रचारेण
मनसापरंतदधिगच्छति १७ धृतिमानात्मवान्बुद्धिंनिगृह्णीयादसंशयं मनोबुध्यानिगृह्णीयाद्विषयान्मनसात्मनः १८
निगृहीतेंद्रियस्यास्यकुर्वाणस्यमनोवशं देवताःसंप्रकाशंतेहृष्टायांतितमीश्वरं १९ ॥ ॥ ॥ ॥ ॥

नविचेष्टतितामाहुःपरमांगतिमितिश्रुतेः १७ आत्मवान्बुद्धिमान्बुद्धिं अहंब्रह्मास्मीतिवाक्यजांधीवृत्तिंमनःसंकल्पविकल्पात्मकंबुध्यातयाहृत्वामनसाविष
यान्शब्दादीन्तेषांविशेषणांआत्मनइतिमनोरूपानित्यर्थः १८ योगावांतरफलमाह निगृहीतेतितितमातस्यामनवस्थायांदेवताःइंद्रियाणि तंयोगिनंईश्वरंयांतिप्रवि
शंतिएतेनतत्त्वज्ञत्वमपिज्ञेयं १९

ताभिर्देवताभिः संयुक्तं एकान्तसंगतं मनः [illegible] यस्य धीमात्रेण स्थापितः सत्वेषीमात्रे ब्रह्मभूयाय ब्रह्मभावाय प्रभुर्वा भावे इति कल्पते २० न प्रवर्तेत योगेष्व
यीं न प्रकाशेत इति पाठे ऐश्वर्यं गणायो योगी विदितो न भवेत् योगतं त्रैविरोधप्रधानैरेव यत्नैरुपक्रमेत् स तपसंकल्पादीन् न भावयेत् किंतु अस्थूलत्वादीनेवेत्यर्थः न तु क
यमेकस्यात्मवस्तुनः सगुणत्वं चेत्यत आह येनेति तत्रैतं त्वप्रतिपाद्ये योगे तत्र यतः अनुतिष्ठतः येन रूपेण विशिष्टा हन्तिः स्यात्तत्तदाचरेत् सविशेषत्वं हि तु पाधिक

ताभिः संसक्तमनसो ब्रह्मतत्त्वं प्रकाशते एतैश्चापगतैः सर्वैर्ब्रह्मभूयाय कल्पते २० अथ ध्यानप्रकाशेत योगतं
त्रैरुपक्रमेत् येन तत्र यतस्तत्र वृत्तिः स्यात्तत्तदाचरेत् २१ कणाकुल्माषपिण्याकशाकयावकसक्तवः तथा मूलफ
लं भैक्ष्यं पयः पिण्याकमुपयोजयेत् २२ आहारं नियमं चैव देशे काले च सात्त्विकं तत्परीक्ष्यानुवर्त्तेत तत्र प्रवृत्त्यनुपूर्वकं २३
प्रवृत्तं नोपरुंधेत शनैरग्निमिवेंधयेत् ज्ञानेधितं तथा ज्ञानं अर्कवत्संप्रकाशते २४ ॥ ॥ ॥

तंस्वतन्त्रस्य निर्विशेषत्वमेवेति भावः २१ कणेति कणादीनपि भक्षयेन्न तु योगेष्वैर्यं उपजीवेत् इत्यर्थः कुल्माषाः पक्वमाषाः यावकं यवचूर्णजं जलोष्मपक्वाः सक्तवः
सक्तून् २३ प्रवृत्तं कर्म तदनुरोधेन योगं अनारंभं न कुर्यात् ज्ञानाचितं कर्मक्रमेण इंधयेत् तथा कुर्वतः ज्ञानं ब्रह्म प्रकाशते २४ ॥ ॥ ॥ ॥ ॥

नन्वात्माभिन्नस्य ज्ञानस्याप्रकाशायोगात्कथंप्रकाशतइत्युक्तिरतआह ज्ञानेति त्रीन्लोकान्जाग्रदादीन् विज्ञानंबुद्धिस्तदनुगतंसधीः स्वप्नोभूत्वाध्यायतीवलेला
यतीवेत्यादिश्रुतेः अज्ञानेनआत्मनादेः आत्मादिबुद्धिरूपेणाविपर्ययेण प्रकाशमानमपिज्ञानंअवस्थात्रयकालुष्यादप्रकाशमानमिवेत्यर्थः २५ नतुसांशत्वंशतः
प्रकाशतेनतुनिरंशतोस्यसर्वात्मनाऽप्रकाशः प्रकाशोवावाच्यइत्याशंक्याह पृथक्त्वादिति अवस्थात्रयातीतमपितत्संप्रयुक्तत्वेनगच्छन्नेवअसत्पुंशा
श्वतमनुपाधिमात्मानंदूषयन्तंतंनवेदतयोः पृथक्त्वापृथक्त्वयोरपवर्गपर्यंतां उपवृत्तमितिपाठेस्वभावंरूपंअवाध्यत्वेनवाध्यत्वेनचजानन् २६ व

ज्ञानाधिष्ठानमज्ञानंत्रींल्लोकानधितिष्ठति विज्ञानानुगतंज्ञानमज्ञानेनापकृष्यते २५ पृथक्त्वात्संप्रयोगाच्चना
सूयुर्वेदशाश्वतं सतयोरपवर्गज्ञोवीतरागोविमुच्यते २६ वयोतीतोजरामृत्यूजित्वाब्रह्मसनातनं अमृतं
तदवाप्नोतियत्तदक्षरमव्ययं २७ शांतौमोक्षधर्मेषुवार्ष्णेयाध्यात्मे॥ ॥भीष्मउवाच निष्कल्मषंब्रह्मचर्यमिच्छताच
रितुंसदा निद्रासर्वात्मनात्याज्यास्वप्नदोषमवेक्षता १ १ १ ॥ ॥ ॥ ॥ ॥

योतीतः जितकालः पाठांतरंसुगमं २७ एकचत्वारिंशः॥ ॥ पूर्वत्रयोगैश्वर्यमननुभूयाननुभूयवाब्रह्मप्रविशेदित्युक्तंतत्रऐश्वर्यानुभवंनिंदितुमारभतेनिःक
ल्मषमितिनिष्कामंब्रह्मचर्ययोगंनिद्राऽविद्यामोहकत्वात्त्याज्यास्वप्नेति।तस्यत्रयआवसथास्त्रयः स्वप्नाइतिश्रुतेः जाग्रत्स्वप्नाविवयोगैश्वर्यमपिसंप्रज्ञा
तकालिकंस्वप्नएवतत्रदोषाः देवांगनेत्ररागादयः तान् १॥

स्वप्नेहि विधेपि देही योगी अयोगी वा २ उक्तनिद्राप्रतियोगिज्जागरणमाह ज्ञानाभ्यासादिति तञ्चिंतनं तत्कथनं अन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ज्ञानाभ्या
सं विदुर्बुधा इत्युक्तविधात् ज्ञानाभ्यासात् तज्जिज्ञासा विचारोर्थः प्रयोजनमस्य तज्जागरणं अनंतरं अनवरतं ज्ञाततत्वस्य तु मुख्यं जागरणमित्याह विज्ञानेति ३
अत्राह पूर्वपक्षीति शेषः स्वप्ने दृश्यमानोयं देहादिभावः पदार्थः कोनु नु वितर्के किं सत्योऽसत्यो वेति विकल्पाद्ये बाधानुपपत्तिरिति सूचयति विषयवानिवे
ति इवकारेण वस्तुतोन विषयवानित्यर्थः ननु यथा उपरिस्थोर्कः जलेऽधस्थ इव भाति तद्वज्जाग्रद्देहादिरेवान्यथा स्वप्ने भातीति नेत्ताव तास्वप्नस्य निर्विषय

स्वप्नेहि रज्जसा देही तमसा चाभिभूयते देहांतरमिवापन्नः स्वदेहापगतस्पृहः २ ज्ञानाभ्यासाज्जागरणं जिज्ञा
सार्थमनंतरं विज्ञानाभिनिवेशात्तु जागरस्त्वनिशं सदा ३ अत्राह कोन्वयं भावः स्वप्ने विषयवानिव प्रलीने
रिंद्रियैर्देही वर्त्तते देहवानिव ४ ॥

त्वमित्याशंक्याह प्रलीनैरिति दृष्टांते जलोपरिसंहतस्थितेनार्कतेजसा प्रतिहतं चाक्षुषं तेजोऽप्रविलीनं प्रतिस्रोतः प्रवृत्तं सदुपरिस्थमप्यर्कं अधःकप्रवृत्तवदि
संस्कारादधइव विषयीकरोति अत्र तु निंद्रियाणां विलीनानां नेति भेदः अन्यथा प्रतिबिंबस्य प्रमसमये पुरोवर्त्तिंद्रियांतरवद्धासंदृशादिकमपि स्वप्ने दृश्येत तस्मा
त्स्वाप्नो भावः न सत्यः इत्यर्थः नाप्यसत्यः असतः शशशृंगादेर्भानायोगात् ४

एवं युक्त्या निरुद्धगतिकः सिद्धांती अनुभवबलेनैवोत्तरयति अत्रोच्यत इति योगेश्वर इति हरिरिति च हेतुगर्भं विशेषणद्वयं योगिसंकल्पमात्रस्व
स्वाप्नाभावः वस्तुत्वात् तु तदभाव एवेति भावः एतद्यथाह हरिर्वेद तथा महर्षयो वर्णयंति उपपन्नार्थं युक्तिमच्चैतदित्यर्थः संकल्पादेवास्य पितरः समुत्तिष्ठ
न्तीति श्रुतेः यथा योगिसंकल्पजं पित्रादिकं तथा स्वप्ने संकल्पजं रथादिकमिति सुवचमित्याशयः ५ सर्वगतं सर्वप्राणिसिद्धं इंद्रियाणामुपरमे संकल्पस्व
भावस्य मनसो नु परमः स्वप्न इत्यर्थः तत्र तस्मिन् स्वप्नविषये नन्तु प्रसिद्धं वक्ष्यमाणं निदर्शनं दृष्टांतः ६ तमेवाह कार्येति मनोरथवत् निवृत्त्या प्रवृत्ति

अत्रोच्यते यथा ह्येतद्वेद योगेश्वरो हरिः तथैतदुपपन्नार्थं वर्णयंति महर्षयः ६ इंद्रियाणामुपरमात्स्वप्नमाहुः
सर्वगतं बुधाः मनसस्त्वप्रलीनत्वात्तत्राहुर्निदर्शनं ६ कार्येष्वासक्तमनसः संकल्पो जाग्रतो ह्यपि यद्व
न्मनोरथैश्वर्यं स्वप्ने तद्वन्मनोगतं ७ संसाराणामसंख्यानां कामात्मा तदवाप्नुयात् मनसोंतर्हितं सर्ववेद
सोत्तमपूरुषः ८

रपि संकल्पमात्रशरीरात् यथा प्राप्येंद्रियैर्विक्षिप्तात्मकं प्रतिभासः स्वप्ने तदभावाज्जाग्रद्द्रष्टृणां समग्ज्ञानमिति विशेष इत्यर्थः ७ स्वप्नादेर्मनोगत
त्वं व्याचष्टे संसाराणामिति प्राचीनानि तेजन्मजन्मसंस्कारात् कामात्मा विषयासक्तचित्तः ततः स्वप्नाद्यैश्वर्यं अवाप्नुयात् कथं तदवाप्तिरत आह स उत्त
मपूरुषः असंहतः साक्षीमात्मानमेयाकारं मनः वेदप्रकाशयति न विक्रियारूपं भोक्तृत्वं साक्षिणः अपितु साक्ष्यप्रकाशकत्वमात्रे यस्तु विक्रि
यावान् प्रमाता संदेशपकोटिस्थ एव न तु साक्षीत्यर्थः ८ ॥

गुणानां सत्त्वादीनां मध्ये पचतकर्मणा प्राचीनेन सत्त्वं रजस्तमो वा उपस्थितं भवति येन च कर्मणाभावितं संस्कृतं मनो यद्भवति तद्भूतानि सूक्ष्माणि तत्तच्छंसे
तितं तस्याधाकारं स्वप्ने निवेदयंतीत्यर्थः ९ ततः आकारदर्शनानंतरं आनंतर्यफलोदये अनंतरमेव सुखाद्युदयं यथासमुपसर्पतीति १० असंबुध्याः ज्ञाना

गुणानामपि पच्येत कर्मणा चाप्युपस्थितं तत्तत्स्थं संति भूतानि मनो यस्त्वावितं यथा ९ ततस्तमुपवर्त्तंते गुणा राजस तामसाः
सात्त्विका वा यथा योगमानंतर्यफलोदये १० ततः प्रशंपत्न्यसंबुध्या वातपित्तकफोत्तरान् रजस्तमोगतैर्भावैस्तद्व्याहुर्हुरत्ययं
११ प्रसन्नैरिंद्रियैर्यद्यत्संकल्पयति मानसं तत्तत्स्वप्नेप्युपगते मनोदृष्टिर्निरीक्षते १२ व्यापकं सर्वभूतेषु वर्त्तते प्रतिबंधनः
आत्मप्रभावात्तेविद्यात्सर्वीयात्मनि देवताः १३

त्ववाताद्युत्तरान् त्रिधातुकान् देहान् पश्यंतीति तद्देहदर्शनांतं दुरत्ययं प्राग्वासनाप्राबल्यात् योगं विना परिहार्यं ११ तत्र तत्र तस्मिन् तस्मिन् १२ व्यापकं उपादानत्वात् अप्रतिबं
प्रतिघातमूर्त्तं तत्र हेतुः आत्मप्रभावात् तं आत्मानं देवताः आकाशाद्याः आत्मज्ञानात् सार्वज्ञं सार्वात्म्यं च प्राप्नोतीत्यर्थः १३ ॥ ॥

एवं स्वप्नावस्थामुक्त्वा सुषुप्तावस्थामाह मनसीति सार्द्धेन द्वारं स्वप्नप्रदर्शनद्वारभूतं स्थूलं देहं मनस्यंतर्हितं आस्थाय तत्रैव देहे स्वपिति सं आत्मानं अपिगच्छति। कुत्र अ-
स्मिन्नव्यक्ते सदसदात्मके मायाशबले निदर्शनं निश्चितं दर्शनं साक्षिरूपं तदेव सर्वेषां भूतानामात्मभूतो हंकारस्तत्र प्रतिविंबात्मना तिष्ठतीति तत्स्था। अध्यात्म-
गुणं आत्मानं अहंकारं गुणाश्च प्रकृतिरूपाः तेषां उपरीति अध्यात्मगुणः अहंकारादिगुणैरस्पृष्टं विंबात्मत्वात् सुषुप्तौ शुद्धे साक्षिरूपे वा हंकाराद्यो लीयंत इत्यर्थः
१४ दृष्टांतभूते स्वप्नसुषुप्ती उक्त्वा दार्ष्टांतिके सवीजनिर्वीजावस्थे योगिगम्ये तत्राद्यां संप्रज्ञातावस्थामाह लिप्सेतेति ऐश्वरं गुणं ज्ञानवैराग्यैश्वर्यधर्मैर्घनं तत्मं।

मनस्यंतर्हितं द्वारं देहमास्थाय मानुषं यथा तत्सदसद्व्यक्तं स्वपित्यस्मिन्निदर्शनं सर्वभूतात्मभूतस्थं तमध्यात्मगुणं
विदुः १४ लिप्सेत मनसा यश्च संकल्पादैश्वरं गुणं आत्मप्रसादं तं विद्यात्सर्वा ह्यात्मनि देवताः १५ एवं हि तप-
सा युक्तं अर्कवत्तमसः परं त्रैलोक्यप्रकृतिर्देही तमसोंते महेश्वरः १६

आत्मप्रसादं चित्तप्रसादजं शुद्धं मनः सर्वं ईश्वर इत्यर्थः १५ तपसा विषयाद्यालोचनेन युक्तं मनः सर्वं भूतं भवति। तमसः परं प्राप्तं तु मनः अर्कवत् ज्ञप्तिमात्रमेव भवति।
तत्रोभयविधं ब्रह्मभावं देहिन आह। त्रैलोक्येति। देही जीवः त्रैलोक्यप्रकृतिः कारणं ब्रह्मेत्यर्थः कारणीभूत तमसोंते तु स एव महेश्वरः शुद्धब्रह्मभूत एवेत्यर्थः। यथोक्तं
सोपाधिर्निरुपाधिश्च द्वेधा ब्रह्म विदुच्यते। सोपाधिकस्यात्तु सर्वात्मा निरुपाख्योनुपाधि इति १६

तप इति अग्निहोत्रादिकं तपः तमः दंभदर्पादि एतत्ब्रह्म तु देवासुरैः हेतुभूतैः रजस्तमोमयैर्न प्राप्यमिति गुप्तं प्रजापतिना कीदृशं ज्ञानलक्षणं ज्ञान
स्वरूपं १७ इममेव विभागं विभजन्नाह सत्वमिति १८ तत्परमं तेभ्यः सात्विकासात्विकेभ्यः भावेभ्यः उत्कृष्टं ज्ञानमेव न तु तपः अमृतं ज्ञानान्तराबाध्यं ज्योतिः स्वप्रकाशं
अक्षरं व्यापकं भावितात्मानः ध्यानादिना शोधितचित्ताः १९ उपसंहरन्नाह हेतुमदिति ज्ञानचक्षुषा तत्वदर्शिना एतावत्वाच्यं कृत्वा सगुणं लक्षणया च निर्गुणं हेतुमत

तपो ह्यधिष्ठितं देवैस्तपोघ्नमसुरैस्तमः एतद्देवासुरैर्गुप्तं तदाहुर्ज्ञानलक्षणं १७ सत्वं रजस्तमश्चेति देवासुरगुणान्विदुः
सत्वं देवगुणं विद्यादितरावासुरौ गुणौ १८ ब्रह्म तत्परमं ज्ञानममृतं ज्योतिरक्षरं ये विदुर्भावितात्मानस्ते यान्ति परमां ग
तिं १९ हेतुमच्छक्यमाख्यातुमेतावज्ज्ञानचक्षुषा प्रत्याहारेण वा शक्यमक्षरं ब्रह्म वेदितुं २० शांतौ मोक्षधर्मेषु वार्ष्णे
याध्यात्म॥ ॥

युक्तियुक्तोपपत्त्या आख्यातुं शक्यं न तु स्वर्गग्राहिकया प्रदर्शयितुं श्रवणमननाभ्यां विदितशब्दयुक्तितत्त्वः सः प्रत्याहारेण विषयेभ्य इंद्रियाणामाकर्ष
णेन ब्रह्म वेदितुं शक्यं योगांगेषु प्रत्याहार एव दुःशकः इतरत्तु संपाद्यमतो ब्रह्मप्राप्तिकामेनेंद्रियाणि जेतव्यानीत्यर्थः २० ॥ ॥ ॥ ॥

उक्तंवक्ष्यमाणंचसाधनजातंसमुच्चिनोतिनसइतिधर्ममितिपाठेऽयंतुपरमोधर्मोयद्योगेनात्मदर्शनमितियाज्ञवल्क्योक्तलक्षणंधर्मंचतुष्टयंप्रवेदोक्तंद
र्शितम्तंस्वप्नसुषुप्त्याख्यंद्वयंदर्शितिकंचसगुणानिर्गुणाब्रह्मभावाख्यद्वयमितिचतुष्टयं व्यक्तंदृश्यं अव्यक्तंचिदात्मा यत्ततत्वमनारोपितंरूपं
यस्यतत्परमर्षिणानारायणेन १ व्यक्ताव्यक्तयोस्तत्वंस्वरूपतः फलतश्चाहद्वाभ्यां व्यक्तमिति ऋषिर्वेदःसएवनारायणावाकत्वान्नारायणः

भीष्मउवाच नसवेदपरंब्रह्मयोनवेदचतुष्टयं व्यक्ताव्यक्तंचयत्तत्वंसंप्रोक्तंपरमर्षिणा १ व्यक्तमृत्युमु
खंविद्यादव्यक्तममृतंपदं प्रवृत्तिलक्षणंधर्ममृषिर्नारायणोब्रवीत् २ तत्रैवावस्थितंसर्वंत्रैलोक्यंसचराचरं नि
वृत्तिलक्षणंधर्ममव्यक्तंब्रह्मशाश्वतं ३ प्रवृत्तिलक्षणंधर्मंप्रजापतिरथाब्रवीत् प्रवृत्तिःपुनरावृत्तिर्निवृत्तिःप
रमागतिः ४ तांगतिंपरमामेतिनिवृत्तिपरमोमुनिः ज्ञानतत्वपरोनित्यंशुभाशुभनिदर्शकः ५ ॥ ॥ ॥

२ ब्रह्मांडाधिपत्यांतंसर्वकर्मफलांतमृत्युनिमित्तंयःनिवृत्तिर्देहेंद्रियाहंकारांतानांबाधःतल्लक्षणोधर्मस्तत्ब्रह्मैव ३ प्रजापतिःस्रष्टारजोमयत्वात् ४ तां
एषोस्यपरमआनंदएषास्यपरमासंपदितिश्रुतिप्रसिद्धांकैवल्यावस्थां शुभाशुभेमुक्तिसंसारौनिदर्शयेनद्रष्टुमिच्छनतुमुमुक्षुर्लौकिकीयापांक्तिपार्थीपा
मितिरावुत्ताज्ञानतत्वंचिदात्मतत्वंतद्विचारपरोनित्यंस्यात् ५ ॥

मो° १३४

134

ततत्रतत्वविचारेकर्त्तव्येएवंवक्ष्यमाणंप्रकारंजानीयात। अव्यक्तंप्रधानं। पुरुषः क्षेत्रज्ञोजीवः महत्तरईश्वरः प्रधानक्षेत्रज्ञपतिर्गुणेशइतिश्रुति
प्रसिद्धंत्रयं ६ तेषुयन्महत्तरं। तंविशेषंक्लेशादिभिरपरामृष्टतयाविशिष्टंपरमात्मानंअवेक्षेत साक्षात्कुर्यात विशेषेणावाध्यत्वावाध्यत्वलक्षणे
नवैपरीत्येन विशेषमेवाहानादीति। उभौप्रधानक्षेत्रज्ञौ अनादी अनंतौ अलिंगौमानांतराविषयौ ७ यौनित्यौमहत्स्मापरिहार्यौएवमादिपुंप्रकृ

तदेवमेतौविज्ञेयावव्यक्तपुरुषावुभौ अव्यक्तपुरुषाभ्यांतुयत्स्यादन्यन्महत्तरं ६ तंविशेषमवेक्षेतविशेषेण
विचक्षणः अनाद्यंतावुभावेतावलिंगौचाप्युभावपि ७ उभौनित्यावविचलौमहद्भ्यश्चमहत्तरौ सामान्यमेतदु
भयोरेवंह्यन्यद्विशेषणं ८ प्रकृत्यासर्गधर्मिण्यातथात्रिगुणधर्मया विपरीतमतोविद्यात्क्षेत्रज्ञस्यस्वलक्ष
णं ९ प्रकृतेश्चविकाराणांद्रष्टारमगुणान्वितं अग्राह्यौपुरुषावेतावलिंगत्वादसंहतौ १० ॥ ॥ ॥

योः साधर्म्यं विशेषणंव्यावर्त्तकंवैधर्म्यंतु एवं विद्यात् ८ एवंकथंतदाहप्रकृत्येति। अप्रसववधर्मानिर्गुणश्चपुरुषइतिविपरीतं ९ विकाराणांमह
दादीनांद्रष्टारंनतुदृश्यं। एवंप्रधानक्षेत्रज्ञयोः साधर्म्यवैधर्म्येउक्त्वाक्षेत्रज्ञेश्वरयोरपिसाधर्म्यमाह अग्राह्याविति। अग्राह्यौयतः पुरुषौचिद्रूपौ। अलिं
गौलिंग्यतेज्ञाप्यतेअनेनेतिगुणादिकंप्रतिसंबंधिलिंगंतद्राहित्यात असंहतौ असंतविविक्तौ १० १० १० १० १०

राम° १३४

नन्वलिंगयोर्जीवेशयोर्लिंगभेदप्रयुक्तो भेदः कुतः स्यादित्याशंक्यौपाधिकस्तयोर्भेदो न स्वतः इत्याशयेनाह संयोगेति संयोगो दृग्दृश्ययसंबंधः लक्ष
णं ज्ञापकं अस्य त्रिगुणाविर्भावहेतुस्वयमस्य संयोगलक्षणोत्पत्तिः कर्त्रेति कर्तुर्बुद्धेश्चित्प्रतिबिंबवत्त्वे लक्षणमुक्तं ननु बुद्धिरेव चिच्छायापन्ना क
र्त्री किं तदुभयतंत्रेणाकर्त्रेत्याशंक्याह कर्मनिर्वृत्तिरिति कर्मणां शास्त्रीयाणां लौकिकानां च निर्वृत्तिर्निष्पत्तिर्यस्मात् अयमर्थः कर्त्ता शास्त्रार्थवत्त्वा
दितिन्यायेन विधिनिषेधशास्त्राक्षिप्तः कश्चिन्नियोज्योऽस्त्यावदस्तिः स च न बुद्धिः तस्याः काष्ठलोष्टसमत्वेनानियोज्यत्वात् नापि पुरुषः अकर्तृत्वा
त्। अतः शास्त्रार्थवत्त्वायैतदुभयसंयोगजः कर्त्ताऽवश्यं प्रधानेश्वरव्यतिरिक्त उक्तलक्षणोऽभ्युपेय इति सः कर्त्तीयघत्तपपापयाकरणै

संयोगलक्षणोत्पत्तिः कर्मजा गृह्यते यया करणैः कर्मनिर्वृत्तिः कर्त्ता यश्च
विचेष्टते ११ कीर्त्यते शब्दसंज्ञाभिः कोऽहमेषोऽप्यसाविति ॥ ॥ ॥ ॥

रिंद्रियादिभिः साधनैर्विचेष्टते कर्म कुरुते तयातया योनिप्रदेन कर्मणा सहितो गृह्यते अतः समानेपि दृग्दृश्यसंयोगे दृश्योपाधिस्वरूपभेदात
कर्तृभेद इत्यर्थः ११ अयं च कर्तृव्यवहारस्तत्त्वतो योपि परमार्थतो दृक्कोटिरेव न तु दृश्यकोटिरिति दृष्टांतमुखेनाहाहंनाकीर्त्यत इति। यथा स्वस्य
कौंतेयत्वमजानानः कर्णः कः कौंतेय इति पृच्छति स एव सूर्येण प्रबोधितोऽहं कौंतेय इति वक्ति एवं अतः किं ब्रह्मेति पृच्छति स एव अहं ब्रह्मेति जा
नाति। एवमेकस्मिन्नपि वस्तुनि उपाधिभेदात् ज्ञानाज्ञानकृतभेदाद्विभिन्नौ शब्दप्रत्ययौ भवतः संज्ञाप्रत्ययः एवं दृश्येपि एषोऽसाविति सामी
प्यासामीप्यकृतौ शब्दप्रत्ययौ एकत्रापि भिन्नौ भवतः। एवं जीवेशाविति १२

उष्मीषी १

ननुविनिगमकाभावात्तदृश्यकोटिरेवकर्त्ताकथंनेत्याशंक्याहउष्णीषवानिति। वस्त्रैः वस्त्रवदाच्छादकैः त्रिभिः स्थूलसूक्ष्मकारणदेहैः यथाउ
ष्णीषादन्यएवंदेहीगुणेभ्योऽन्यइत्यर्थः नहिप्रतिबिंबमुखंदर्पणेदृश्यमानमपिदर्पणकोटिगतंतथात्रीवापीतिभावः १३ चतुष्टयंदेवप्रधानयोः
साधर्म्यवैधर्म्येद्वेजीवेश्वरयोस्वसाधर्म्यवैधर्म्येइतिएतैःपूर्वोक्तैःअनाद्यनंतत्वेनचिज्जडत्वेन असंहतत्वेनकर्तृत्वेनचेतिचतुर्भिर्हेतु

135

उष्णीषवान्यथावस्त्रैस्त्रिभिर्भवतिसंवृतः संवृतोयंतथादेहीसत्वराजसतामसैः १३ तस्माच्चतुष्टयंवेद्य
मेतैर्हेतुभिराहृतं यथासंज्ञाह्यंसम्यग्गतकालेनमुह्यति १४ त्रिपंदिव्यामभिप्रेसुवर्ष्मवान्मनसाशुचिः
शारीरैरिंद्रियैरुग्रैस्वैरोनिष्कल्मषंतपः १५

भिः आहृतंयथासम्यग्व्याख्यातमित्यर्थः यथासंज्ञोउक्तविध्वंस्यानमनतिक्रांतः अंतकालेसिद्धांतसमये १४ एतच्चतुष्टयंज्ञात्वाय
त्कर्त्तव्यंतदाहत्रियमितिदिव्यादिविहाहृकाशेब्रह्मणिभवांवर्ष्मवान्देहवान् शारीरैः शरीरनिर्वर्त्यैः नियमैः शौचसंतोषतपःस्वाध्याये
श्वरप्रणिधानाख्यैः निष्कल्मषंनिष्कामंतपः योगं १५ १५